अध्याय 5: सुभाषितानि

विषय-सूची

11 प्रश्नावली · 53 प्रश्न

प्रश्नावली 1	एकपदेन उत्तरं लिखत	5 प्रश्न
प्रश्नावली 2	अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत	6 प्रश्न
प्रश्नावली 3	अधोलिखिते अन्वयद्वये रिक्तस्थानपूर्तिं कुरुत	2 प्रश्न
प्रश्नावली 4	अधोलिखितानां वाक्यानां कृते समानार्थकान् श्लोकांशान् पाठात् चित्वा लिखत	4 प्रश्न
प्रश्नावली 5	यथानिर्देशं परिवर्तनं विधाय वाक्यानि रचयत	5 प्रश्न
प्रश्नावली 6	(अ) सन्धिं/सन्धिविच्छेदं कुरुत (आ) समस्तपदं/विग्रहं लिखत	8 प्रश्न
प्रश्नावली 7	अधोलिखितानां पदानां विलोमपदानि पाठात् चित्वा लिखत	7 प्रश्न
प्रश्नावली वाक्यप्रयोगः	संस्कृतेन वाक्यप्रयोगं कुरुत	5 प्रश्न
प्रश्नावली अन्वयः	सुभाषित-श्लोकानाम् अन्वयः (रिक्तस्थानपूर्तिसहितः)	5 प्रश्न
प्रश्नावली भावार्थ	सुभाषित-श्लोकानाम् भावार्थः (मञ्जूषातः रिक्तस्थानपूर्तिः)	4 प्रश्न
प्रश्नावली परियोजनाकार्यम्	परियोजनाकार्यम्	2 प्रश्न

प्रश्नावली 1 — एकपदेन उत्तरं लिखत

प्रश्न 1

(क) मनुष्याणां महान् रिपुः कः?

उत्तर: आलस्यं

प्रश्न 2

(ख) गुणी किं वेत्ति?

उत्तर: गुणं

प्रश्न 3

(ग) केषां सम्पत्तौ च विपत्तौ च महताम् एकरूपता?

उत्तर: महताम् (महापुरुषाणाम्)

प्रश्न 4

(घ) पशुना अपि कीदृशः गृह्यते?

उत्तर: उदीरितोऽर्थः

प्रश्न 5

(ङ) उदयसमये अस्तसमये च कः रक्तः भवति?

उत्तर: सविता (सूर्यः)

प्रश्नावली 2 — अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत

प्रश्न 1

(क) केन समः बन्धुः नास्ति?

उत्तर: उद्यमसमः बन्धुः नास्ति।

प्रश्न 2

(ख) वसन्तस्य गुणं कः जानाति?

उत्तर: वसन्तस्य गुणं पिकः जानाति।

प्रश्न 3

(ग) बुद्धयः कीदृश्यः भवन्ति?

उत्तर: बुद्धयः परेङ्गितज्ञानफलाः भवन्ति।

प्रश्न 4

(घ) नराणां प्रथमः शत्रुः कः?

उत्तर: नराणां प्रथमः शत्रुः क्रोधः अस्ति।

प्रश्न 5

(ङ) सुधियः सख्यं केन सह भवति?

उत्तर: सुधियः सख्यं सुधीभिः सह भवति।

प्रश्न 6

(च) अस्माभिः कीदृशः वृक्षः सेवितव्यः?

उत्तर: अस्माभिः फलच्छायासमन्वितः वृक्षः सेवितव्यः।

प्रश्नावली 3 — अधोलिखिते अन्वयद्वये रिक्तस्थानपूर्तिं कुरुत

प्रश्न 1

(क) यः ..... उद्दिश्य प्रकुप्यति तस्य ..... सः ध्रुवं प्रसीदति। यस्य मनः अकारणद्वेषि अस्ति, ... तं कथं परितोषयिष्यति?

उत्तर: यः निमित्तम् उद्दिश्य प्रकुप्यति तस्य अपगमे सः ध्रुवं प्रसीदति। यस्य मनः अकारणद्वेषि अस्ति, जनः तं कथं परितोषयिष्यति।

प्रश्न 2

(ख) ..... संसारे खलु ..... निरर्थकम् नास्ति। अश्वः चेत् ..... वीरः, खरः ..... वहने (वीरः) (भवति)।

उत्तर: विचित्रे संसारे खलु किञ्चित् निरर्थकम् नास्ति। अश्वः चेत् धावने वीरः, खरः भारस्य वहने (वीरः) (भवति)।

प्रश्नावली 4 — अधोलिखितानां वाक्यानां कृते समानार्थकान् श्लोकांशान् पाठात् चित्वा लिखत

प्रश्न 1

(क) विद्वान् स एव भवति यः अनुक्तम् अपि तथ्यं जानाति।

उत्तर: अनुक्तमप्यूहति पण्डितो जनः।

प्रश्न 2

(ख) मनुष्यः समस्वभावैः जनैः सह मित्रतां करोति।

उत्तर: समान-शील-व्यसनेषु सख्यम्।

प्रश्न 3

(ग) परिश्रमं कुर्वाणः नरः कदापि दुःखं न प्राप्नोति।

उत्तर: नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।

प्रश्न 4

(घ) महान्तः जनाः सर्वदैव समप्रकृतयः भवन्ति।

उत्तर: सम्पत्तौ च विपत्तौ च महतामेकरूपता।

प्रश्नावली 5 — यथानिर्देशं परिवर्तनं विधाय वाक्यानि रचयत

प्रश्न 1

(क) गुणी गुणं जानाति। (बहुवचने)

उत्तर: गुणिनः गुणं जानन्ति।

प्रश्न 2

(ख) पशुः उदीरितम् अर्थं गृह्णाति। (कर्मवाच्ये)

उत्तर: पशुना उदीरितः अर्थः गृह्यते।

प्रश्न 3

(ग) मृगाः मृगैः सह अनुव्रजन्ति। (एकवचने)

उत्तर: मृगः मृगैः (मृगेण) सह अनुव्रजति।

प्रश्न 4

(घ) कः छायां निवारयति। (कर्मवाच्ये)

उत्तर: केन छाया निवार्यते?

प्रश्न 5

(ङ) तेन एव वह्निः दह्यते। (कर्तृवाच्ये)

उत्तर: सः एव वह्निः शरीरं दहति।

प्रश्नावली 6 — (अ) सन्धिं/सन्धिविच्छेदं कुरुत (आ) समस्तपदं/विग्रहं लिखत

प्रश्न 1

(अ) सन्धिं/सन्धिविच्छेदं कुरुत

हल

सन्धिः / सन्धिविच्छेदः —

(क) न + अस्ति + उद्यमसमः = नास्त्युद्यमसमः

(ख) तस्य + अपगमे = तस्यापगमे

(ग) अनुक्तम् + अपि + ऊहति = अनुक्तमप्यूहति

(घ) गावः + च = गावश्च

(ङ) न + अस्ति = नास्ति

(च) रक्तः + च + अस्तमये = रक्तश्चास्तमये

(छ) योजकः + तत्र = योजकस्तत्र

उत्तर: नास्त्युद्यमसमः; तस्य + अपगमे; अनुक्तमप्यूहति; गावः + च; न + अस्ति; रक्तश्चास्तमये; योजकः + तत्र।

प्रश्न 2

(आ) समस्तपदं/विग्रहं लिखत — (क) उद्यमसमः

उत्तर: उद्यमेन समः

प्रश्न 3

(ख) शरीरे स्थितः

उत्तर: शरीरस्थः

प्रश्न 4

(ग) निर्बलः

उत्तर: बलेन हीनः

प्रश्न 5

(घ) देहस्य विनाशनाय

उत्तर: देहविनाशाय

प्रश्न 6

(ङ) महावृक्षः

उत्तर: महान् च असौ वृक्षः

प्रश्न 7

(च) समानं शीलं व्यसनं येषां तेषु

उत्तर: समानशीलव्यसनेषु

प्रश्न 8

(छ) अयोग्यः

उत्तर: न योग्यः

प्रश्नावली 7 — अधोलिखितानां पदानां विलोमपदानि पाठात् चित्वा लिखत

प्रश्न 1

(क) प्रसीदति

उत्तर: अवसीदति

प्रश्न 2

(ख) मूर्खः

उत्तर: पण्डितः

प्रश्न 3

(ग) बली

उत्तर: निर्बलः

प्रश्न 4

(घ) सुलभः

उत्तर: दुर्लभः

प्रश्न 5

(ङ) संपत्तौ

उत्तर: विपत्तौ

प्रश्न 6

(च) अस्तमये

उत्तर: उदये

प्रश्न 7

(छ) सार्थकम्

उत्तर: निरर्थकम्

प्रश्नावली वाक्यप्रयोगः — संस्कृतेन वाक्यप्रयोगं कुरुत

प्रश्न 1

(क) वायसः

उत्तर: वायसः कृष्णः वर्णः भवति।

प्रश्न 2

(ख) निमित्तम्

उत्तर: दुष्टस्य कलहस्य किमपि निमित्तम् न भवति।

प्रश्न 3

(ग) सूर्यः

उत्तर: प्रकाशस्य स्रोतः सूर्यः एव अस्ति।

प्रश्न 4

(घ) पिकः

उत्तर: पिकः आम्रवृक्षे स्थित्वा मधुरं गायति।

प्रश्न 5

(ङ) वह्निः

उत्तर: 'वह्नि' इति पदम् अग्नेः पर्यायपदम् अस्ति।

प्रश्नावली अन्वयः — सुभाषित-श्लोकानाम् अन्वयः (रिक्तस्थानपूर्तिसहितः)

प्रश्न 1

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः। नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।

हल

अन्वयः- मनुष्याणाम् शरीरस्थः (i)..... रिपुः आलस्यम्। (ii)..... बन्धुः न (iii)..... यं कृत्वा (नरः) (iv)..... अवसीदति।

उत्तर: मनुष्याणाम् शरीरस्थः (i) महान् रिपुः आलस्यम्, (ii) उद्यमसमः बन्धुः न (iii) अस्ति यं कृत्वा (नरः) (iv) न अवसीदति।

प्रश्न 2

निमित्तमुद्दिश्य हि यः प्रकुप्यति, ध्रुवं स तस्यापगमे प्रसीदति। अकारणद्वेषि मनस्तु यस्य वै, कथं जनस्तं परितोषयिष्यति॥

हल

अन्वयः- यः निमित्तम् (i)..... प्रकुप्यति, सः (ii)..... अपगमे (iii)..... प्रसीदति, वै यस्य मनः तु अकारणद्वेषि तं (iv)..... कथं परितोषयिष्यति।

उत्तर: यः निमित्तम् (i) उद्दिश्य प्रकुप्यति, सः (ii) तस्य अपगमे (iii) ध्रुवं प्रसीदति, वै यस्य मनः तु अकारणद्वेषि तं (iv) जनं कथं परितोषयिष्यति।

प्रश्न 3

उदीरितोऽर्थः पशुनापि गृह्यते, हयाश्च नागाश्च वहन्ति बोधिताः। अनुक्तमप्यूहति पण्डितो जनः, परेङ्गितज्ञानफला हि बुद्धयः॥

हल

अन्वयः- पशुना अपि उदीरितो (i)..... गृह्यते, हयाः नागाः च (ii)..... वहन्ति, पण्डितः (iii)..... अनुक्तम् (iv)..... ऊहति बुद्धयः परेङ्गितज्ञानफलाः भवन्ति।

उत्तर: पशुना अपि उदीरितो (i) अर्थः गृह्यते, हयाः नागाः च (ii) बोधिताः वहन्ति, पण्डितः (iii) जनः अनुक्तम् (iv) अपि ऊहति बुद्धयः परेङ्गितज्ञानफलाः भवन्ति।

प्रश्न 4

अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम्। अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः॥

हल

अन्वयः- अमन्त्रम् (i)..... न अस्ति (ii)..... मूलं नास्ति अयोग्यः पुरुषः (iii)..... अस्ति (iv)..... योजकः दुर्लभः।

उत्तर: अमन्त्रम् (i) अक्षरम् न अस्ति, (ii) अनौषधम् मूलं नास्ति, अयोग्यः पुरुषः (iii) न अस्ति, (iv) तत्र योजकः दुर्लभः।

प्रश्न 5

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्। अश्वश्चेद् धावने वीरः भारस्य वहने खरः॥

हल

अन्वयः- विचित्रे (i)..... खलु किञ्चित् (ii)..... नास्ति, अश्वः (iii)..... धावने वीरः (तर्हि) (iv)..... वहने खरः (वीरः) अस्ति।

उत्तर: विचित्रे (i) संसारे खलु किञ्चित् (ii) निरर्थकम् नास्ति, अश्वः (iii) चेत् धावने वीरः (तर्हि) (iv) भारस्य वहने खरः (वीरः) अस्ति।

प्रश्नावली भावार्थ — सुभाषित-श्लोकानाम् भावार्थः (मञ्जूषातः रिक्तस्थानपूर्तिः)

प्रश्न 1

निमित्तमुद्दिश्य हि यः प्रकुप्यति, ध्रुवं सः तस्यापगमे प्रसीदति। (भावार्थ — मञ्जूषा: भूत्वा, निवारणम्, क्रोधः, कारणं)

हल

भावार्थः- नरस्य क्रोधस्य किमपि (i)..... भवति यदि तस्य कारणस्य एव (ii)..... भवति तदैव (iii)..... स्वयमेव शाम्यति (iv)..... च प्रसीदति।

उत्तर: (i) कारणं (ii) निवारणम् (iii) क्रोधः (iv) भूत्वा

प्रश्न 2

परेङ्गितज्ञानफला हि बुद्धयः। (भावार्थ — मञ्जूषा: अनुक्तम्, विद्वान्, संकेतेन, पशुना)

हल

भावार्थः- उक्तः अर्थः तु (i)..... अपि प्राप्यते परम् (ii)..... सः एव कथ्यते यः (iii)..... अपि तथ्यं (iv)..... एव अवगच्छति।

उत्तर: (i) पशुना (ii) विद्वान् (iii) अनुक्तम् (iv) संकेतेन

प्रश्न 3

समान-शील-व्यसनेषु सख्यम्। (भावार्थ — मञ्जूषा: यादृशः, तादृशैः, मित्रता, सह)

हल

भावार्थः- अस्य भावः अस्ति यत् मनुष्यः (i)..... भवति स्वस्वभावानुसारेण (ii)..... जनैः (iii)..... तस्य (iv)..... भवति।

उत्तर: (i) यादृशः (ii) तादृशैः (iii) सह (iv) मित्रता

प्रश्न 4

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्। अश्वश्चेद् धावने वीरः भारस्य वहने खरः॥ (भावार्थ — मञ्जूषा: महत्त्वम्, संसारः, निरर्थकम्, अश्वः)

हल

भावार्थः- निश्चयमेव अयं (i)..... विचित्रः वर्तते यत्र किञ्चित् अपि (ii)..... न अस्ति। यदि (iii)..... धावने श्रेष्ठः तर्हि गर्दभः भारवहने। यथासमयम् सर्वेषामेव (iv)..... विद्यते।

उत्तर: (i) संसारः (ii) निरर्थकम् (iii) अश्वः (iv) महत्त्वम्

प्रश्नावली परियोजनाकार्यम् — परियोजनाकार्यम्

प्रश्न 1

(क) उद्यमस्य महत्त्वं वर्णयतः पञ्चश्लोकान् लिखत। अथवा कापि कथा या भवद्भिः पठिता स्यात् यस्याम् उद्यमस्य महत्त्वं वर्णितम्, तां स्वभाषया लिखत।

हल

LearnCBSE-पृष्ठे उदाहरणार्थं पञ्चश्लोकाः प्रदत्ताः — 1. न दैवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मनः। अनुद्यमेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति॥ 2. षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता। निद्रा तन्द्रा भयं क्रोधम् आलस्यं दीर्घसूत्रता॥ 3. श्रमेण लभ्यं सकलं न श्रमेण विना क्वचित्। सरलाङ्गुलिसंघर्षात् न निर्याति धनं घृतम्॥ 4. उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः। न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥ 5. यत्रोत्साहसमारम्भो यत्रालस्यविहीनता। नयविक्रमसंयोगस्तत्र श्रीरचला ध्रुवम्॥

अथवा — कथा (काकस्य उदाहरणम्): एकदा एकस्मिन् उद्याने एकः काकः पिपासितः आसीत्। सः जलं पातुम् इतस्ततः अभ्रमत्, परम् कुत्रापि जलं न प्राप्नोत्। अन्ते सः एकं घटम् अपश्यत्, तस्मिन् स्वल्पम् जलम् आसीत्। अतः काकः पाषाणखण्डानि घटे अक्षिपत्, एवं क्रमेण जलम् उपरि आगच्छत्। जलं पीत्वा काकः प्रसन्नः अभवत्। अतएव उच्यते — परिश्रमेण एव कार्याणि सिध्यन्ति न तु मनोरथैः।

उत्तर: छात्राः उद्यमविषयकान् श्लोकान्/कथां स्वयं लिखन्तु (उपरि उदाहरणानि द्रष्टव्यानि)।

प्रश्न 2

(ख) निमित्तमुद्दिश्य यः प्रकुप्यति ध्रुवं स तस्यापगमे प्रसीदति। यदि भवता कदापि ईदृशः अनुभवः कृतः तर्हि स्वीकृतभाषया लिखत।

हल

LearnCBSE-पृष्ठे उदाहरणम्: एकदा परीक्षासमये प्रातरेव अहम् 'क्रिकेट' खेलितुम् स्वमातरम् अपृच्छम्। मम माता तु पठनाय एव आदिशत्। तदा अहम् कुपितः अभवम्। कुपितं माम् दृष्ट्वा माता उक्तवती — 'पठनात् अनन्तरम् क्रीडनाय गच्छ।' एतत् श्रुत्वैव मम कोपः सहसैव लुप्तः अभवत्।

उत्तर: छात्राः स्वानुभवं स्वभाषया स्वयं लिखन्तु (उपरि उदाहरणं द्रष्टव्यम्)।